This question paper contains 15 printed pages]

*Your Roll No.* ...............

**1618**

**B.A. (Hons.)/III** **D**

SANSKRIT—Paper IX (*ii*)

(Adhunika Sanskrit Sahitya)

(Admission of 2006 and onwards)

*Time* : 3 *Hours* *Maximum Marks* : 75

(*Write your Roll No. on the top immediately on receipt of this question paper.*)

*Note* :— Unless otherwise required in a question, answers should be written in Sanskrit *or* in Hindi *or* in English.

**टिप्पणी** :— अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत **या** हिंदी **या** अंग्रेजी किसी एक भाषा में दीजिए।

1. निम्नलिखित का सप्रसंग अनुवाद कीजिए : 4×2=8

Translate the following with reference to the context :

(क) जनताकृतिः शान्तिसुखहीना

संस्कृति दशाऽतिमलिना दीना ।

P.T.O.

केवल निजहितसाधनलीना

राजनीतिरचना स्वाधीना

न तुलसीदलं

न गङ्गाजलं

स्वदते यथा सुरा । तदेव गगनं सैव धरा ॥

**अथवा**

(*Or*)

तरिकः स्वमानपोषः

नौर्दण्ड आत्मतोषः

आरुह्य शान्तितरणिं जगदर्णवं तरेयम् ।

इच्छामि जीवनं तत् यस्मिन् सुखं वसेयम् ॥

वाञ्छामि सुस्थलं तत् स्वैरं यतः श्वसेयम् ॥

(ख) जनानां कल्याणे निरत इयताप्यस्य गणना

न नेतृणां मध्ये न च हलधरः सन्नपि हली ।

अयं कर्ता भर्ता क्रुधि भवति हर्ता च जगतः

परं चित्रं यन्न त्रिषु परमदेवेषु गणितः ॥

**अथवा**

(*Or*)

चिरबुभुक्षितैर्वृकैरकस्मात्

स्वर्णमयी रोटिकाऽसादिता ।

ये विविधासित-कर्म-विलग्नाः

तदङ्केषु लक्ष्मीर्विराजिता

धिक् कष्टं वैषम्यम् ।

लोका अवलोकयत ॥

प्रतिशाखं संस्थिता उलूकाः लोका अवलोकयत ॥

2. निम्नलिखित की सप्रसंग व्याख्या कीजिए : 5

Explain the following with reference to the context :

क्षीणदुग्धा विवत्सा बुभुक्षाकुला:

साश्रुनेत्रा गवाशैर्विकृष्टा मुहु:

गा नदन्ती: समुत्प्रेक्ष्य शृङ्गाटके

बन्धनच्छेदनै: को नु गोपायते ॥

**अथवा**

(*Or*)

भूतकालो नैव पुनरावर्तते विदितं त्विदम्

भ्रष्टतारा नैव चाभ्रं प्राप्नुते विदितं त्विदम्

तुहिनसंवृतमानसेभ्य: किमिति दूरं यान्ति नो

जीर्णपर्णं नैव शाखामाश्रयति विदितं त्विदम् ॥

कुण्ठित: श्वासो न पुरत: सञ्चलति विदितं त्विदम् ॥

3. संस्कृत में व्याख्या कीजिए : 5

Explain in Sanskrit :

अकारं नो इकारं नो उकारं नैव जानन्ति ।

तथाप्युच्चैः पुरस्कारैः प्रशस्यन्ते नरास्ते के ॥

**अथवा**

(*Or*)

हृदये भवेन्न भीतिः

पणके न चातिप्रीतिः

उदरस्य पूरणार्थं मानं न च त्यजेयम् ।

इच्छामि जीवनं तत् यस्मिन् सुखं वसेयम् ॥

4. प्रो. हरिदत्त शर्मा **अथवा** प्रो. आर. श्रीहरि के जीवन एवं उनकी रचनाओं पर निबन्ध लिखिये । 6

Write an essay on the life and works of Prof. Haridutt Sharma *Or* Prof. R. Srihari.

5. "तदेव गगनं सैव धरा" कविता का आधुनिक संदर्भ में मूल्यांकन कीजिये । 6

Evaluate the poem "तदेव गगनं सैव धरा" in the modern context.

**अथवा**

(*Or*)

"कृषकश्रमिकभिक्षुकाः" कविता द्वारा प्राप्त होने वाले सामाजिक संदेश का अपने शब्दों में वर्णन कीजिये ।

Describe the social message conveyed through the poem "कृषकश्रमिकभिक्षुकाः" in your own words.

6. निम्नलिखित का सप्रसंग अनुवाद कीजिए : 4

Translate the following with reference to the context :

आश्रमस्य समीपं मृगैरनुयाताः वनान्तरादुपावृत्ताः, समित्कुशफलहारिणश्च ब्रह्मचारिणः प्रथमं सुदामानमपश्यन् । तस्य रूपं शीलं वृत्तिं च निरीक्ष्य 'स्ववर्गीयोऽयम्' इति ते विभावयन्ति स्म । ते झटिति एव तस्य कमण्डलुपेटिकादिकं गृहीत्वा तं मुक्तभारं कृत्वा मार्गश्रमं विनोदयितुं द्वारस्थपर्णशालां नीतवन्तः । स्नानाचमनयोरनन्तरं सोऽभ्यागताचारानुरूपं मुनिभोजनं फलमूलादिकं गृहीतवान् । सायंकाले सब्रह्मचारिभिः सुदामा सान्दीपनेः महर्षेः सार्वजनिकप्रवचनकक्षायां यथाविधानं प्रथमं समुपस्थापितः ।

अथवा

(*Or*)

मथुरावासकाले कृष्णः मित्रं सुदामानं सश्रीकं विधातुकाम एकदा तस्मै निवेदितवान्- ब्रह्मन्, इदानीं भवान् स्नातकः । स्नातकः समाजस्य सुप्रतिष्ठितो नागरिको भवति । तदनुरूपं भवता नित्यमेव स्वशरीरं प्रसाधनीयम् । वेषभूषादिभिः भवता भद्रेण भवितव्यम् । पुराणं जीर्णं मलिनं वा वस्त्रं न परिधानीयम् । तत्सर्वमिदं सौष्ठवं धनेनैव शक्यसम्पादम् । धनं हि स्नातकेन स्वशक्तीनां सदुपयोगेनार्जितव्यम् । किन्तु भवतः प्रवृत्तिः तादृशी नास्ति । भवान् धनार्जनं कर्तुं न वाञ्छति । तर्हि भवतः स्नातकधर्मस्य निर्वाहः कथं भवेत् ?

7. निम्नलिखित की सप्रसंग व्याख्या कीजिए : 5

Explain the following with reference to the context :

तयोरुपनयनं महर्षिणा सुदाम्नः अनन्तरं कृतम् । आचार्यः नवान् ब्रह्मचारिणः समादिष्टवान्-यूयमेकस्मिन् दिने समुपनीताः,

सब्रह्मचारिणः। युष्माभिः सदैव सह वर्तितव्यं सर्वेषु नियोजनीयेषु । युष्मासु सुदाम्नो ज्येष्ठत्वं विहितं मया, तस्य ब्रह्मकामत्वात् । आचार्यः प्रवचनं प्रारब्धवान्–ओ३म् । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु । मा विद्विषाव है ।

**अथवा**

(*Or*)

पौरजनाः तस्यै बहुविधानि श्रेष्ठान्याभूषणानि ददुः । तस्मिन् दिवसे सा कौमुदी सर्वेषां स्नेहस्यैकायतनमभूत । गृहीत सर्वाभरणा कौमुदी पुष्पैः लतेव, ज्योत्स्नाभिः विभावरीव, पक्षिभिः निर्झरिणीव च शुशुभे। स्वकीयं रूपसौन्दर्यं विभूषणैः प्रसाधनैश्च द्विगुणीकृतं निर्मलादर्शे परिलक्ष्य सा तदधिकृत्य सुदाम्नोऽपि प्रशंसामाशशंसे । सत्यमेव भणितं विज्ञैः–'प्रियेषु सौभाग्यफला हि चारुता' इति ।

8. ''द्वा सुपर्णा'' उपन्यास में चित्रित सुदामा का चरित्र-चित्रण कीजिये । 6

Sketch the character of Sudama as depicted in the novel ''द्वा सुपर्णा'

**अथवा**

*(Or)*

कृष्ण और सुदामा की मित्रता के संदर्भ में ''द्वा सुपर्णा'' उपन्यास के नाम की सार्थकता सिद्ध कीजिये ।

Evaluate the heading of the novel ''द्वा सुपर्णा'' in the context of Krishna-Sudama's friendship.

9. निम्नलिखित का अनुवाद कीजिए : 4+4

Translate the following :

(क) शारदी – यत् मया पूर्वं कथितं स एव मार्गः ।

वृद्धसदनम् ।

शरद् — शारदि भवतु । क्रूरतमोऽपि जनः यत् न कुर्यात् तत् अहं गृहसंसारस्य शान्त्यर्थे करिष्यामि । हीनतमोऽपि न कुर्यात् तत् तातस्य मम तातस्य निष्कासनं करिष्यामि येन गृहे शांतिर्भवेत् ।

शान्तिलालः — (प्रविशन्) नास्ति निष्कासनस्य कापि आवश्यकता । न वा कोऽपि मां मम गृहात् निष्कासितुं शक्तः । वत्स शरद्, वत्से शारदि ! श्रुतं निद्राव्याजेन मया युवयोः सम्भाषणम् । किन्तु शरद् ! भगवतो महेश्वरस्य कृपया अधुना अयं ते तातः शान्तिलालः, स्वचरणाभ्यां चलित्वा श्मशाने स्वचिताम् अधिरोढुं समर्थः । रे कुलांगार कुलघातक, श्वानमुखं गमिष्यामि,

वृकभक्षणं भविष्यामि, गृध्रमुखे पतिष्यामि किन्तु पुनरपि अस्मिन् मम स्वोपार्जिते किन्तु अनुधना उत्तरेण अपहृते गृहे पदमपि न दास्यामि ।

**अथवा**

(*Or*)

शान्तिलालः – देवि मा मा एवं कथय । वृक्षा वाणीपापं मा कुरु । देवि ! ईश्वरस्य नगर्यां सुविलम्बः अवश्यं वर्तते । किन्तु नैव अंधकारः । पुण्यस्य घटः यदा संपूर्णो भवति पापस्य घटः यदा रिक्तो भवति तदा शुभफलं, मनसेप्सितं फलं प्राप्यते। एवं भवतु यथा भवत्यै रोचते । परन्तुं अहं शिवालयम् अवश्यं गच्छामि याचनाय। आजीवनम् अयाचकव्रतधारी अहम् । अवश्यं नीलकण्ठः शीघ्रवरदाता तस्य भक्तस्य याचनां, पुत्रेच्छां पूरयिष्यति एव । अतः मा रोदीः ।

शान्तिः — नाथ ! यदि न रोदिमि तर्हि किं करोमि? प्रभो ! पुत्रस्य अभावे आवयोः पिण्डदानं कः करिष्यति ? श्राद्धतर्पणादिं विना आवयोः मुक्तिः कथं कथं भविष्यति ? देहि देहि मे तनयम् ।

(ख) पण्डितः — (अधिकारिसमूहं निर्दिशन्) अधिकारिणस्तु स्वशौर्येण मातृभूमिं समलंकुर्वन्ति । दिष्ट्याऽस्मत् कुमाउनीय-सेनायां श्रेष्ठाः सैन्यसञ्चालकाः सन्ति । (अङ्गुल्या निर्दिशन्) पश्य ! अयं जेनरलो हरीश्वरमहाभागः यत्र कुत्राऽपि युद्धे संवृत्ते, सदैव विजयश्रियं प्राप्तवान् । एवम् एवाऽन्येऽपि ।

लेखकः — तत् पुनरपि विजयश्रीः प्राप्स्यते ।

पण्डितः — अथ किम् । न कथमप्याशा त्याज्या निष्णातोऽसौ, वीर्योपपन्नश्च । युद्धनीति-विशारदः, अत एव समुपार्जिता सुविमला कीर्तिः तेन समराऽऽङ्गणेषु ।

**अथवा**

(*Or*)

सेनापति हरीश्वरः — प्रतिवर्ष श्रूयते यत् भारतीयाऽनीकस्य शस्त्र-परिग्रहः सर्वथा प्राचीनोऽ-प्रगल्भश्च । विदितमेव स्यात् यत् युद्धविमानसञ्चारो नष्टप्रचार एव । तदपि तं संवर्धयितुं नाऽद्यावधि किम् अपि प्रयतितं बत ।

मेजररूपसिंहः — दौर्भाग्य यत् भारतं तु सदैव नैकविधैः क्लेशैरभितप्तं ननु । वस्तुतो महोघैः, दुर्भिक्षैः इतिभिः वा प्रतिवर्ष विक्षुब्धोऽयं देशः ।

कर्नलशिखेरः — विपदस्तु सर्वत्र सकलेषु एव राष्ट्रेषु आपतन्ति एव । परं दौर्भाग्येण केवलं राष्ट्रस्योद्योगीकरणे एव तत्परा अस्मांक नेतारः ।

सेनापति हरीश्वरः — देशरक्षैव प्रथमो धर्म इति विस्मृतं तैः ।

10. 'अर्थो हि पुत्रः परकीय एव' एकांकी का आधुनिक संदर्भ में मूल्यांकन कीजिये । 6

Evaluate the one-Act-play titled 'अर्थो हि पुत्रः परकीय एव' in the modern context.

11. (*i*) किन्हीं **दो** पर संक्षेप में टिप्पणी लिखिये : 6

Write short notes on any *two* :

लीलाराव दयाल, पुष्पादीक्षित, श्रीस्वामिविवेकानन्दचरितम्

प्रो. रसिकविहारी जोशी, प्रो. सत्यव्रत शास्त्री

(*ii*) आधुनिक संस्कृत साहित्य की किन्हीं **तीन** गद्य रचनाओं **अथवा** महाकाव्यों का वर्णन कीजिये 6

Describe any *three* prose-kavyas *or* Mahakavyas in modern Sanskrit literature.

(*iii*) संस्कृत की किन्हीं **चार** पत्रिकाओं पर लघु टिप्पणी लिखिये । 4

Write short notes on any *four* Sanskrit Magazines.